तिरुमलतिरुपतिदेवस्थानानि

सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

May 2026

Rs.20/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:13 Issue: 02
May 2026, Price Rs.20/-
No. of pages-24



तिरुपतिस्थ
श्रीगोविन्दराजस्वामिनः ब्रह्मोत्सवाः
23.05.2026 आरभ्य 31.05.2026 पर्यन्तम्









ओण्टिमिट्ट - श्रीकोदण्डरामस्वाम्यालये श्रीरामनवमी ब्रह्मोत्सवाः अत्यन्तवैभवोपेततया निर्वाहिताः। अस्मिन्नेव कार्यक्रमे भागवत्वेन श्रीसीतारामकल्याणमहोत्सवः (01.04.2026) तिथौ आन्ध्रप्रदेशप्रभुत्वपक्षतः गौरवनीय मुख्यमन्त्रिणः श्रीनाराचन्द्रबाबुनायुडुमहोदयाः सतीसमेतः श्रीसीतारामयोः पीताम्बराणि समर्पितवन्तः। ति.ति.देवस्थानेन वैभवोपेततया निर्वाहित ब्रह्मोत्सवेषु भागं गृहीतेभ्यः सर्वभक्तेभ्यः तिरुमलश्रीवेङ्कटेशस्य मोदकप्रसादान् मौक्तिकसहितमङ्गलाक्षताः समर्पितवन्तः।







गीतामृतम्

श्रीभगवानुवाच -

लोकेऽस्मिन् द्विविधानिष्ठापुरा प्रोक्ता मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्।।

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च सन्न्यसनादेव सिद्धिंसमधिगच्छति।।

(भगवद्गीता ३.३,४.)

३. भावः - पापरहित! हे अर्जुन! सृष्ट्यादौ अस्मिन् लोके सांख्ययोगिभ्यः ज्ञानयोगः, योगिनां निष्कामकर्मयोगः मया निर्णीतः। द्विविधान्यप्यनुष्ठानानि मोक्षप्राप्तये मया प्रोक्तानि।

विशेषांशः - जीविनः संस्कार भेदेन बहवः सन्ति। अन्तःकरण शुद्धियुतानां ज्ञानयोगं, अन्तःकरण शुद्धिरहितानां कर्मयोगः प्रोक्तः, आचरणीयश्च।

४. भावः - पुरुषेण अनुष्ठीयमान कर्माननुष्ठानात् निष्कामकर्मणा प्राप्तव्यपदवीं (निष्क्रियात्मज्ञानं) न प्राप्स्यति। निष्कामकर्मानुष्ठानात् अथवा देहसन्न्यासमात्रेण नैष्कम्यसिद्धिं न प्राप्स्यति।

सङ्कीर्तनम्

माधव केशव मधुसूदन विष्णु
श्रीधरापदानखं चिन्त यामो वयम्
वामन गोविन्द वासुदेव प्रद्युम्न
राम रामकृष्ण नारायणाच्युत
दामोदरा निरुद्ध दैव पुण्डरीकाक्ष
नामत्रयोऽधीश नमो नमो
पुरुषोत्तम पुण्डरीकाक्ष दिव्य
हरि संकर्षण अथोक्षज

नरसिंह हृषीकेश नगधर त्रिविक्रम
शरणागतरक्ष जय जय सेवे
महति जनार्दन मत्स्यकूर्मवराह
सहजभार्गव बुद्ध जय तुर (ग) कल्कि
विहितज्ञान श्रीवेङ्कटेश शुभकरम्
अहमिह तवपददास्यमनिशं भजामि।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ४०)



सर्वंजगत् लक्ष्मीनिवासः

नियतं कुरु कर्मत्व कर्म ज्यायोह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।। (३-८)

येन केनापि निष्कर्मणा न भवितव्यम्। अकर्मणः कर्माचरणं श्रेयस्करम्। तेन जीवनयात्रायाः विघ्नः न स्यात् इति भगवद्गीतावचनम्। कर्माचरणं आरोग्याय सम्पत्प्राप्तेः आधारभूतम्। सम्पदारोग्ये लक्ष्मीस्वरूपे। लक्ष्मीदेव्याराधनं नाम जाड्यं परित्यज्य निरन्तरं कार्यनिमग्नतैव। केचित् शारीरकश्रमं केचित् मानसिक श्रममाचरन्ति। द्वयोराधाराधेयबावसम्बन्धः वर्तते। अतः यः कोऽपि न निन्द्यः। परस्परगौरव प्रदर्शनं कर्तव्यम्।

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः
दैवेन देयमिति का पुरुषा वदन्ति।
दैवं निहत्य कुरुपौरुषमात्मशक्त्या
यत्ने कृते यदि न सिद्ध्यति कोऽत्रदोषः।।

ये सेत्साहं क्लेशानप्यनुभूय कर्मकुर्वन्ति लक्ष्मीः स्वयं तानुपैति। अयं श्लोकः ''कष्टमाचरन्तः पुरुषाः स्त्रियः वा सिंहतुल्याः इति ''उपैति'' लक्ष्मीः। लक्ष्मीदेवी तेषु आशीः प्रयोक्तुं घावतीति अर्थं द्योतयति। यद्वातत् भवतु। अस्माकं हस्तेषु किमपि कार्यफलं नास्ति इति केचित् निरुत्साहतया वदन्ति। तदा कथनमनुचितम्। ''दैवं निहत्य कुरुपौरुषमात्मशक्तया'' इति आत्मशक्तया कार्येषु उद्यमः कर्तव्यः। यद्वा भवतु इति न मन्तव्यम्। जनकः, प्रह्लादः, अम्बरीषः, धर्मव्याधः, भगीरथः स्वस्वकर्तव्यविधीन् विध्युक्तकर्माणि आचर्य आत्मविचारणेन मोक्षं प्राप्ताः। ''श्रमः एव जातेः लक्ष्मीः'' लौकिकाध्यात्मिकसम्पदोः श्रमः एव समुचितमार्गः श्रमात् सम्पल्लभ्यते। समस्तोत्पत्तेः श्रमः एव मूलम्। श्रमैकजीवनसौन्दर्यस्य तुल्यं किमपि नास्ति। श्रमे सौन्दर्यं आनन्दश्च वर्तते।

लघुलघुकर्मकारिणः, व्यवसायक्षेत्रेषु पारिश्रामिकवाटिकासु, कर्म कुर्वतां श्रामिकानामभावे उत्पत्तिः स्थगिता भवेत्। तद्वारा जीवनप्रमाणानां विघ्नः स्यात्। अत एव श्रमं सम्पदित, श्रामिकं सम्पत्सृष्टिकर्तारं सम्भाव्यसम्माननीयम्। धार्मिकव्यवस्थायामपि श्रामिकानभागस्वाम्यं गणनीयमेव। भक्तावश्यक बहुसौकर्याण्यारभ्य देवालयप्राङ्गणशुचीकरण पर्यन्तं विविधशाखासु कर्मकारिषु भगवदंशः वर्तते इति ज्ञात्वा तेषु गौरवप्रदर्शनं श्रामिकदिनोत्सववैभवम्। श्रमः एव लक्ष्मीस्वरूपम्। श्रामिकाः एव निजलक्ष्मीसमाराधकाः।

श्रमाय वन्दनम् - श्रामिकेभ्य वन्दनम्

वेङ्कटाद्रिसमं स्थानं
ब्रह्माण्डे नास्ति किञ्चन ।
वेङ्कटेशसमो देवो
न भूतो न भविष्यति ॥

तिरुमलतिरुपतिदेवस्थानम्

सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

गौरवसम्पादकः-
श्री मुद्दाड.रविचन्द्र, I.A.S.,
कार्यनिर्वहणाधिकारी,
ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः(F.A.C.)
डा।। वि.जि.चोक्कलिङ्गम्,M.A., Ph.D., P.G.Dip in JMC

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयक्रेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः,
सहायक-छायाचित्रग्राहकः,
ति.ति.दे.

सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
— *प्रधानसम्पादकः*

स्वस्तिश्री चान्द्रमानश्रीपराभवनामसंवत्सर वैशाखशुक्लपूर्णिमा शुक्रवारादारभ्य-
अधिकज्येष्ठशुद्धपूर्णिमा-आदिवारपर्यन्तम् - २०२६

मे - २०२६

सम्पुटिः-१३ सञ्चिका-०२

कूर्मजयन्ती - डा.वि.माधवरेड्डि	06
महर्षेः अगस्त्यस्यमहत्त्वम् - आचार्य जि.पद्मनाभम्	08
हनुमान् चालीसा	11
पतिव्रताशिरोमणिः गान्धारी - डा. एन्.गुणवती	15
वज्रदेहजयन्ती हनुमञ्जयन्ती - डा. के.कोटेश्वरय्य	16
तिरुपति गोविन्दराजस्वामिभ्यः ब्रह्मोत्सवः - डा. पि.माधवी	19
श्लोकोऽयं प्राणरक्षकोऽभूत् (चित्रकथा) - डा. के.सूर्यनारायणरेड्डि	20
द्वादशराशीनां फलानि - आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः	22

मुखचित्रम् - उभयदेवीभ्यां सह श्रीगोविन्दराजस्वामी, तिरुपति।
अन्तिमपुटचित्रम्:- श्रीवीरवेङ्कटसत्यनारायणस्वामी, अन्नवरम्,काकिनाडा.आ.प्रे.।



सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.
दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३

सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -

sapthagiri_helpdesk@tirumala.org

एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

कूर्मजयन्ती

- डा. वि.माधवरेड्डि
चरवाणी - ९९४८५२३२५९

अस्मिन् २०२६ वर्षे कूर्मजयन्तीं मे मासे शुक्रवासरे प्रथमतिथौ निर्वहिष्यन्ति। वर्षे वर्षे वैशाख शुद्ध पौर्णम्यां इदं पर्वदिनं प्रायशः निर्वहन्ति। अष्टादशपुराणेषु पञ्चदशपुराणमिदम्। अमृतप्राप्तये देवदानवैः समुद्र मथन सन्दर्भे मञ्जन्मन्दरपर्वतं स्वपृष्टे निक्षिप्य मथनकार्यस्य निर्विघ्न परिसमाप्त्यर्थं विष्णोरवतारोऽयम्। आन्ध्रप्रदेशे श्रीकाकुलमण्डले श्रीकूर्मदेवालयः एकैकः प्रधान पुण्यक्षेत्रत्वेन विराजते। अस्मिन् दिने कूर्मरूप पूजया निर्विघ्नकार्य समाप्तिः मानसिकस्थिरत्वं च भवेदिति भक्तानां विश्वासः।

कूर्मावतारकथा - दुर्वासशापः - महाविष्णोरवतारेषु द्वितीयावतारः कूर्मावतारः। देवदानवमध्ये अनेकयुद्धानि प्रवृत्तानि। देवैः प्रथमतः अमरत्वं न लब्धम् कदाचित् दुर्वासमुनिः स्वर्गाधिपस्य इन्द्रस्य अभिमानतया एका पुष्पमालां ददौ। मार्गमध्ये लब्धां तां पुष्पमालां देवेन्द्रः स्वैरावतगजशिरसि निवेशात् सः गजः शिरः कम्पयित्वा तां पुष्पमालां अधः पतितां पद्मार्दितां चकार। तद्दृष्ट्वा दुर्वसाः देवेन्द्रं तद्राज्य स्थान् सर्वान् शक्तिहीनाः भवेयुरिति शशाप। राक्षसदुष्कृत्य वाधिताः देवाः शक्तिहीनाः ब्रह्माणं रुद्रं शरणमवापुः। ते सर्वे रक्षणार्थं महाविष्णुदर्शनार्थं जग्मुः। विष्णुः देवता बाधाः श्रुत्वा क्षीरसागरमथनाय आदिदेश।

सागरमथनम् - मन्थरपर्वतं मन्थनीं कृत्वा वासुकिं रज्जुं कृत्वा देवदानवाः अमृतार्थं क्षीरसागरमथनं प्रारेभिरे। पर्वतमज्जने अगम्यगोचराः देवाः विष्णुं प्रार्थयामासुः।

कूर्मावतारः - देवताप्रार्थनां श्रुत्वा विष्णुः लक्षयोजन विस्तीर्णं जम्बद्वीपपर्यन्तमायप्रमाणं स्वपृष्टं यथा स्यात् तथा कूर्मरूपं धृत्वा पर्वतं उन्नमय्य मज्जनाद्ररक्ष। कूर्मस्तोत्रम् - कूर्मपुराणान्तर्गतम्

मुनयःऊचुः -

१. नमस्ते कूर्मरूपाय विष्णवे परमात्मने।
नारायणाय विश्वाय वासुदेवाय ते नमः।।
२. नमोनमस्ते कृष्णाय गोविन्दाय नमो नमः।
माधवाय नमस्तुभ्यं नमो यज्ञेश्वराय च।।
३. सहस्रशिरसेतुभ्यं सहस्राक्षाय ते नमः।
नमः सहस्रहस्ताय सहस्रचरणायच।।
४. ओं नमो ज्ञानरूपाय परमात्मस्वरूपिने।
आनन्दाय नमस्तुभ्यं मायातीताये ते नमः।।
५. नमो गूढशरीराय निर्गुणाय नमोऽस्तुते।
पुरुषाय पुराणाय सत्तामात्रस्वरूपिणे।।
६. नमः सांख्याय योगाय केवलाय नमोऽस्तुते।
धर्मज्ञानाधिगमयाय निष्कलाय नमोऽस्तुते।।
७. नमस्ते व्योमरूपाय महायोगेश्वराय च।
परावराणां प्रभवे वेदवेद्याय ते नमः।।
८. नमो बुद्धाय शुद्धाय नमो युक्ताय हेतवे।
नमो नमो नमस्तुभ्यं मायिने वेधसे नमः।।
९. नमोऽस्तु ते वराहाय नारसिंहाय ते नमः।
वामनाय नमस्तुभ्यं हृषीकेशाय ते नमः।।
१०. स्वर्गापवर्गदात्रे च नमोऽप्रतिहतात्मने।
नमो योगाधिगम्याय योगिने योग दायिने।।



तेजस्वमध्ये तेजस्वी दवीयानपि गण्यते।

११. देवानां पतयेतुभ्यं देवार्तिशमनाय ते।
भगवन् त्वं प्रासदेन सर्वसंसारनाशनम्।।
१२. अस्मिभिर्विदितं ज्ञानं यदूज्ञात्वामृतमश्नुते।
श्रुवातुविविधाधर्माः वंशाः मन्वन्तराणि च।।
१३. सर्गश्च प्रतिसर्गश्च ब्रह्मण्डस्यास्य विस्तरः।
त्वं हि सर्वजगत्साक्षी विश्वोनारायणः परः।
त्रातुमर्हस्यनन्तात्मा त्वमेव शरणं गताः।।

कूर्मपुराणसंक्षिप्त विषयाः

''कौर्मं पृष्टं समाख्यातम् श्रीमन्नारायणस्य पृष्ठभागत्वेन वर्णितमिदं पुराणम्। अत्र सप्तदशसहस्रश्लोकाः वर्तन्ते। पूर्वार्धे ५३, उत्तरार्धे ४५ आहत्य ९९ अध्यायाः सन्ति। कूर्म रूपस्थ महाविष्णुः इन्द्रसमक्षं महर्षिभ्यः उपदिष्टमिदं पुराणम्। अत्र लक्ष्मीदेवी - इन्द्रद्युम्न संवादः, विष्णु महर्षिमध्यसंवादः, सृष्टिप्रक्रिया वर्णाश्रमधर्माः, भृगुवंशवर्णनम्, द्वादशादित्य वर्णनम्, हेमकूटवर्णनम्, अष्टाङ्गयोगः, शौचविधिः, वानप्रस्थाश्रम महत्त्वम् यतिभिक्षाप्रकाशः सुरापान प्रायश्चित्तम् नर्मदानदी महत्त्वम्, इत्याद्यंशाः कूर्मपुराणे वर्णिताः।

मरीचिः भृगुः, अङ्गिरसः पुलस्त्यः, पुरहः, क्रतुः, दक्षः अत्रिः वशिष्ठः एते नव ब्रह्मपुत्राः इति पुराणेऽस्मिन् प्रोक्तम्। पुरा सर्वे जनाः बाधारहिताः शुद्धान्तःकरणाः स्वाधर्माचरणपरायणाः आसन्। क्रमशः कालवशात् रागद्वेष विशिष्टाः आसन्निति कूर्मपुराणवचनम्।

धर्ममधिकृत्य - धर्मात्सञ्जायते ह्यर्थो धर्मात् कामोऽभिजायते। धर्म एवापवर्गाय तस्माद्धर्मं समाचरेत्।।

इत्युक्तम्।

शिवकेशवाभेदः - देवदेवः शिवः सृष्टिस्थितिलयकारकः शिवस्य रूपमेव विष्णुः। इदं रहस्यं विष्णुरेवं वदति- सृज्यते जगतकृस्नं पातिसंहरतेतया।

सृज्यते जगत्कृस्नं पातिसंहतेतया।
कालोभूत्वा महादेवः केवलो निष्कल शिवः।। इत्यादि
भक्तसेवानुगुणं शिवः अभीष्टान् ददाति।
यं यं भेदं समाश्रित्य यजन्ति परमेश्वरम्।
तत्तद्रूपं समास्थाय प्रददतिफलं शिवः।।

केचित् समाजे स्वकर्तव्यं परित्यज्य तीर्थयात्रा व्याजेन परिभ्रमन्ति। तादृशभ्रमणात् उभयलोकेऽपि फलं शून्यमिति कूर्मपुराणवचनम्। पवित्र स्थलेषु मलमूत्रविसर्जनं न कर्तव्यम् पुण्यक्षेत्रदर्शनं पापनिवारकम्। काशी क्षेत्रदर्शनं प्रशस्तम्। वेदविभागकर्तारः सर्वे व्यासाः। एतेषां संख्या २६ इति पराशरसुतः कृष्णद्वैपायनः २६ संख्यासम्बन्धी भवति। गुरुसन्निधौ प्रवर्तनविधानम् -

न पादौ सारेयेदस्य सन्निधाने कदाचन।
जृम्भाहास्यादिकं चैवकण्ठप्रावरणं तथा।।
निन्दयेत् गुरुन् देवान् वेदान् वेदंवा सोपबृंहणम्।
कल्पकोटिशतं सोग्रं रौरवै पथ्यतेनरः।।

विष्णु भक्ताग्रेसरस्य प्रह्लादस्य पुत्रः विरोचनः धर्मराजपालकः सनकमारोपदेशं प्राप्य आत्मज्ञानसम्पन्नः पुत्रस्थ बलेः राज्यभारमर्पयित्वा योगविद्यालीनः बभूव। महायज्ञे बलिः ब्राह्मणेभ्यः सर्वेभ्यः अभीष्टं दानं ददौ। विष्णुः देवमातुः अदितेः प्रार्थनामङ्गीकृत्य वामनरूपं धृत्वा स्वपदाभ्यां क्रमितं देशमयाचत बलिम्। सन्तुष्टः बलिः भूम्याकाशावक्रम्य तृतीय पादं बलिशिरसिन्यस्तवान्। बलिः पातालं प्राप्य ततः विष्णु सायुज्यमवाप। एवं वामनचरतमत्यद्भुतं पुराणेऽस्मिन् वर्णितम्। बह्व्यः भक्तिप्रदायक कथाः कूर्मपुराणे वर्तन्ते।

एवंकूर्मपुराणन्तु चतुर्वर्गफलप्रदम्।
पठतां श्रृण्वतां नृणां सर्वोत्कृष्टगतिप्रदम्।।

भक्तदुर्जयकथा - चन्द्रवंशे महाभक्तो दुर्जयो नाम राजा आसीत्। तस्य भार्या महापतिव्रता। कदाचिद्यमुनातीरे ऊर्वशी सौन्दयाकृष्टाः किञ्चित्काल पर्यन्तं तया सह कालं यापयित्वा स्वनगरं प्राप्य भार्यया पतिव्रतया ज्ञातदोषः कण्वाश्रमे प्रायश्चित्तं भार्यावचनानुसारं कृतोऽपि कस्यचित् गन्धर्वस्यकण्ठे स्वेन ऊर्वश्यै दत्तकण्ठहारं दृष्ट्वा तं हारं गन्धर्वाद्वशीकृत्य मानससरोवरे पुनः ऊर्वशीं प्राप्य तां कण्ठहारेण अलङ्कृत्य शारीरकसुखं प्राप्य नगरं गत्वा किं कृतोऽसि इति तया पृष्टः भार्याहितवचनानि उवाच। सा अस्मात् स्थानात् गच्छ, मुनिशापं, भार्याग्रहं प्राप्स्यसीति उक्त्वा स्वशरीरे कामभावनां परित्यक्तुं विकृतरूपमवाप। तदा दुर्जयः आत्मनिन्दां कुर्वन् विरक्तः कन्दमूलफलैः द्वादशवर्षान्। तोयमात्राहारः तीव्रतप सा यापयित्वा ततः कण्वमहर्षेः सर्वं वृत्तान्तं निवेदयित्वा करुण्यवतः मुनीश्वरस्य उपदेशात् काशीं गत्वा विश्वेश्वरदर्शनं प्राप्य प्राप्तप्रायश्चित्तः दुर्जयः पुनः स्वनगरमागत्य धर्मबद्धतया प्रजारञ्जकतया राज्यमपालयत्।



महर्षेः अगस्त्यस्यमहत्त्वम्

- आचार्य जि.पद्मनाभम्
चरवाणी -९२४७३२८२८६

अगस्त्याय नमस्तेऽस्तु अगस्त्योऽस्मिन्
अगस्त्यो द्विजरूपेण प्रतिगृह्णातु सत्कृतः।
अगस्त्य सप्तजन्माघं नाशयित्वाऽवयोरयं
अपत्यं विमलं सौख्यं प्रयच्छतु महामुनिः।।

स्वतपोमहिम्ना सृष्टिस्थितिलयकाराः अपि महर्षयः विश्वसंरक्षणार्थं त्रिमूर्तिकृत्यम्यन्यपि निर्वहणसमर्थाः। आर्तिसमयेषु उद्धारकसंरक्षणतत्पराः भरतखण्डजाताः विश्वविख्याताः महर्षयः।

एतादृशेषुभारत ब्रह्मर्षितु अगस्त्यमहर्षिः अग्रेसरः। वसिष्ठसहजातः त्रिकालवेदी भक्तिज्ञानविरागनिधिः गृहस्थरत्नम्। अस्य जन्मकथा अतिविचित्रा। अग्निवायुदेवभीताः देवताबाधाकराः राक्षसाः समुद्रे प्रविष्टाः। समुद्रशोषणात् जलस्थसर्वजीवराशेः विनाशः स्यादिति समुद्रनिलीनसक्षससंहारे उपेक्षाकृतवन्तौ वायु-अग्निदेवौ भूमौ अचेतनपदार्थादुद्भूय मुनीभवेतामिति इन्द्रः शशाप। नरनारायणः ऊरोः ऊर्वशीं ससर्ज। तां दृष्ट्वा मित्रावरुणयोः वीर्यपतनं जातम्। तौ मित्रावरुणौ तद्वीर्यं जलपूर्णकलशे निवेशयित्वा यथेच्छ जग्मतुः। तज्जलकलशात् अगत्स्यवशिष्टौ जातौ। अत एवैतयोः कलशजः कुम्भसम्भवः और्वशेयः, मित्रवरुणाविति वह्निजलसम्भवाविति नामागतम्।

अगस्त्यस्य बाल्यम् - जातः अगस्त्यः शुक्लपक्षचन्द्रः इव देदीप्यमानः महानिष्ठागरिष्ठः तपसा प्रकाशमानः देवताभिः उपनयनसंस्कारं, प्रणवपञ्चाक्षरी मन्त्रोपदेशमवाप। कदाचित् वृक्षशाखाधोमुखाः पितृदेवताः अगस्त्येन दृष्टाः तव सन्तानाभावदेवेदृशदुःस्थितिरस्माकमागतेति त्वं विवाहितः सन्तानवान् भवेति प्रार्थितः। पितृदेवतानां ऊर्ध्वलोकगमनार्थं अगस्त्यः परिणीय गृहस्थाश्रमं स्वीकर्तुं सन्तानं प्राप्तुमङ्गीचकार।

अगस्त्याववाहः - अगस्त्यः विदर्भराजस्य पुत्रोजननाय तीव्रतपः आचर्य तस्यलक्ष्मीतुल्य पुत्रजन्मकारकः बभूव। तस्याः युक्ते वयसि आगते लोपमुद्रानन्मीं तां विवाहे मह्यं दीयतामिति विदर्भ राज मयायत। लोकपामुद्रापि मुनिवरेण विवाहमङ्गीचकार। कदाचित् अगस्त्यः सन्तानार्थं लोपामुद्रा सङ्गमपेक्षितवान्। सा सङ्गमात्पूर्वं समस्ताभरणवस्त्रादीनि मह्यं देयानीति भर्तारमपृच्छत्। अतः अगस्त्यः आभरणवस्त्रार्थं तपोव्ययं कर्तुमनिच्छन् तदर्थं श्रुतर्दु, प्रघ्नश्वुत्रदस्युराजसकाशं जगाम। तेषां सकाशे तत्सम्पद भावात् अगस्त्यः राजत्रयेण मिलितः बहुधनयुक्त वातापील्वसकशं जगाम।

मणिपुराधिपतिः इल्वलः विख्यातबलः। अस्य सोदरः वातापी कामरूपी। इल्वलः उत्तम ब्राह्मणमेकं सकलकाल सिद्धिकरमन्त्रमुपदेष्टुं याचितः विफलः स्वसोदरमजांकृत्वा तं हत्वा तन्मांसं तद्ब्राह्मणस्य भोजनरूपे दत्वा खादनानन्तरं सोदरं वातापिमाजुहाव। वातापि तद्ब्राह्मणोदरं विदीर्य बहिरागतः। सः ब्राह्मणः अम्रियत। एवमातिथिरूपेणागतान् ब्राह्मणान् हन्ति स्म। अगस्त्यः तद्वृत्तनां ज्ञात्वा वातापिमांसं भुक्त्वा ''जीर्णं जीणं वातापि जीर्णमिति'' इति कथनात् अगस्त्यवाक्बलात् वातापि जीर्णः बभूव। तदा इल्वलः भीतः अगस्त्यस्य, आगतेभ्यः राज्ञः अपरिमितधनाभरणानि, अश्वान् हेममयरथं गाश्च ददौ। अगस्त्यः इल्वलदत्ताभरणानि अमूल्य वस्त्राणि च भार्यायै ददौ। ततः अगस्त्ये न लोपमुद्राया समागमात् तस्याः अनवद्यः दृढस्युनामकः पुत्रः अजायत। दृढस्योः तेजस्वी नामक पुत्रः अजायत। एवमगस्त्यः पुत्रपौत्रसम्पन्नः पित्रुभ्यः पुण्यलोकप्रप्तिं ददौ।

अगस्त्येन कवेरकन्याविवाहः - कदाचित् ब्रह्मा अगस्त्याश्रमं जगाम। ब्रह्मा स्वागमन कारणमेवमुवाच - :







पुरा कदाचित् कवेरः राजर्षिः परमशिवमधिकृत्यमहातपः आचर्य मुक्तिं देहीति प्रत्यक्ष्यं शिवमपृच्छत्। शिवः विरिञ्चिरेव तव वांछां पूरयिष्यति नाहं समर्थः विरिञ्चिमधिकृत्य तपः समाचर इत्यवोचत्। कवेरः मामधिकृत्य घोरतपः आचचार। प्रत्यक्षीभूतोऽहं तद्वांछासिद्धये मत्पुत्री विष्णुमाया तस्य पुत्रीरूपे जनिष्यतीति अवोचत्। ततः कवेरस्य पुत्रिका अजायत। सा अद्य पितुः मुक्तिप्रदानाय उग्रतपः आचरति। तस्याः एकांशः एव तव भार्या लोपामुद्रा। त्वं कवेरकन्याया अपि पाणिग्रहणं कुरु त्वं श्रेयः प्राप्स्यसीत्यवोचत्।अगस्त्यः विरिञ्चवचनमनुसृत्य कवेरकन्यां परिणेतुं तदन्वेषण निमग्नः बभूव। अन्वेषणे तत्समीपं प्राप्तः तस्यातिथ्यनमस्कादीन् दत्वा आगमनकारणं अपृच्छत्। अगस्त्यः ब्रह्माभिमतमनुसृत्य मां वृणीष्वेत्य वोचत्। सा लोपामुद्रा तवधर्मपत्नी किल कथं मम त्वया भार्यात्वमिति प्रश्नात् अगस्त्यः लोपामुद्रा त्वदंशेनैव जाता एतत्सत्यम्। भाविनद्यपि त्वं अहं तव पत्नीत्वमभिलाषामीत्यवोचत्। तदा कवेरतनया अङ्गीकृत्य अगस्त्यं परिणीतवती। ततः अगस्त्यः तां स्वकमण्डले निवेशयामास। पश्चात् विन्ध्यगर्वापहरणार्थं अगस्त्यः गच्छन् स्वकमण्डलुं शिष्यान् च आनय इत्युक्त्वा जगाम। सह्यपर्वतसमीपे अगस्त्य भावितस्वकार्यं स्मृत्वा कवेरकन्या नदीभूत्वा भूमौ पतिता प्रवहति। सैव कावेरी नदी। एतस्यां नद्यां स्नानात् कवेरराजर्षिः सद्योमुक्तः बभूव।

अगस्त्येन समुद्रोदकापोशनम् - कृतयुगे वृत्तः राक्षसः कालकेयादि राक्षसैः सह इन्द्रादि देवताः विजित्य पीडयति स्म। दधीचिशल्यनिर्मितवज्रायुधेन वृत्रे मृतेऽपि कालकेयगणः दिवा समुद्रे निलीय रात्रौ वशिष्टाश्रमे १९७, च्यवनाश्रमे १००, भरद्वाजाश्रमे २० ब्रह्मविदः भक्षयामासुः। एतदुपद्रवनिवारणार्थं इन्द्रयमाग्निवरुणकुबेरादयः विष्णुमूर्तिं प्रार्थयामासुः। विष्णुः अगस्त्यः एव एतदुपद्रवपरिहारकः, सः समुद्रजलं पास्यति। ततः शोषिते समुद्रजले बहिरागतकालकेयादीन् संहरन्तु इत्युपायमुवाच। झटिति अगस्त्य समीपं गत्वा तं प्रार्थयित्वा देवाताः आगमनकारणमूचुः। अगस्त्यः देवहितार्तं समुद्रजलं आपोशनञ्चकार। तदा कालकेयादयः बहिरागताः विजृम्भितदेवगणैः निश्शेषं हताः। तुष्टाः देवाः अगस्त्यं बहधा कीर्तयामासुः। ततः बहुजीवा श्रयसमुद्रं पुनः पूरयितुं प्रार्थितः अगस्त्यः पीतं समुद्रजलं उदरे जीर्णं बभूवेति केवलं मूत्रद्वारा समुद्रं पूरयिष्यामीत्युक्त्वा तथैव कृत्वा समुद्रममस्त्यः पूरयामास। मूत्रजलत्वादेव समुद्रजलं अद्यापि लवणजलं भवतीति सर्वविदितमेव।

आगस्त्येन श्रीरामायोपकृतिः - ततः अगस्त्यः दण्डकारण्यमध्ये आश्रमे वसति स्म। श्रीरामे अगस्त्याश्रमे प्रविष्ठे सति रामाय दिव्यखड्गयुग्मं वैष्णवकार्मुकं, अमोधबाणान्. अक्षयबाणाश्रयं तूणीरं दत्वा पञ्चवट्यां रावणतीव्रबाणप्रहारैः विस्मृतभाविकर्तव्यं श्रीरामं प्राप्य त्वं विष्णुमूर्तिरिति ज्ञापयित्वा तं अनन्तप्रभावं कीर्तयित्वा जयप्रदं मङ्गलसौख्यावहं दुरित द्रीकरणसमर्थं पुण्यमहास्तवं आदित्यहृदयं श्रीरामाय उपदिश्य रामं उत्साह विजृम्भितं चकार। तत्पारायणात् रामः अचिरकाले शत्रुनिर्मूलनं कृत्वा युद्धे विजयलक्ष्मीमवाप। श्रीरामपट्टाभिषेकसमये अयोध्यामागतः रावणादीनां जननवृत्तान्तं विज्ञापयामास। श्रीरामः कुशलवजननन्तरं पुष्पकविमानारूढः अगस्त्याश्रमं जगाम। तदा अगस्त्यः विचित्र रत्नमयदिव्यविभूषणं

दत्वा श्वेतकेतुराजर्षिः ममेद रत्नमय विभूषणं ददाविति उक्त्वा तस्य दण्डकारण्यवृत्तान्तं श्रुत्वा रामः ततः अगस्त्यं सङ्कीर्त्य अयोध्यां ययौ।

अगस्त्यमहर्षिणा नहुषस्य शापः - कदाचित् नहुषः राजा ब्रह्मवित् शतयज्ञान् विधाय उत्तमपालकः सन् देवत्वं प्राप्य देवताभिमानं प्राप्तः इन्द्रः वर्षं न वर्षापयामास। तदा अगस्त्यः स्वयमेव इन्द्रपदवीं प्राप्य लोकत्रयादपि सम्पदानीय यज्ञं निर्वहिष्यामीत्यवोचत्। तदा भीतः इन्द्रः मुनिभिः सह आगत्य वर्षं वर्षापयमास। यज्ञः परिसमाप्तः। ततः अगस्त्यः तारकमन्त्रोपदेशार्थं अविमुक्तक्षेत्रं गत्वा विश्वेश्वरं सेवतेस्म।

विन्ध्यपर्वतगर्वभङ्गः - विन्ध्यपर्वतः मेरुपर्वते असूयया ''सूर्यः मेरुपर्वतप्रदक्षिणं करोति। न मत्पर्वतप्रदक्षिणं करोतीति महोन्नततया वृद्धः सूर्यचन्द्रगमनावरोधञ्चकार। रात्रिन्दिवाविर्भावा भावात् देवताः ब्रह्माणं शरणं प्रापुः। ब्रह्मा अगस्त्यं शरणं प्राप्तुं सूचयामास। देवताः अगस्त्यं काशीनगरे गङ्गतीरस्थं सह शरणं मयुः। अगस्त्यः देव कार्यनिमित्तं विन्ध्यपर्वतप्रान्तसमीपं ययौ। तत्र अगस्त्यःआवां दम्पती दक्षिणापथे तीर्थदर्शनार्थं गच्छावः, ततः शिशूरङ्गधिरोहणं न करिष्यावः, अस्मदागमनपर्यन्तं त्वं भूसमौन्नत्ये भव इति कथनात् तवाज्ञानुल्लघनीयेति स्वौन्नत्यात् विन्ध्यपर्वतः भूसमः बभूव।

अगस्त्येन दक्षिणकाशीगमनम् - अगस्त्यः काशीवियोगबाधा परिहारार्थं प्रस्थाय दक्षिणकाशीति प्रसिद्धान्ध्रदेशे दक्षवाटभीमेश्वरादिक्षेत्रदर्शनानन्तरं कोल्हापुर लक्ष्मीदर्शनं कृत्वा तां बहुधास्तोषीत्। ततः लोपामुद्रायै सर्वतीर्थमाहात्म्यमुवाच। ततः श्रीशैलदर्शनानन्तरं कुमारस्वामिनं ददर्श। कुमारस्वामिना पृष्टः पराशरादिप्रोक्तसदाचारमहत्त्वं तस्मै विशदीचकार। व्यासः विश्वेश्वरकोपात् काशीं परित्यज्य सशिष्यः गच्छन् मार्गमध्ये अगस्त्येन मिलितः काशीपरित्यागकारणानि विशदीकृत्य ततः अगस्त्यात् भीमेश्वरादिपुण्यक्षेत्रमहत्त्वं अजानीत्। पार्वतीपरमेश्वरविवाहदर्शनार्थं सर्वदेवताभिः आक्रान्ता उत्तरदिग्भूमिः अधः पपात। दक्षिणदिग्भूमिः उत्थिता आसीत्। तदा अगस्त्यः लोपामुद्रासहितः सर्वेश्वरप्रार्थितः दक्षिणदेशमाजगाम। तदा भूमिः समवर्तिनी आसीत्। अगस्त्यः दिव्यदृष्ट्या दक्षिणदिग्भागादेव पार्वतीपरमेश्वरकल्याणम पश्यत।

अगस्त्येन इन्द्रद्युम्नशापः - कदाचित् इन्द्रद्युम्नः द्रविडाधीशः शैलाग्रे वैष्णवोत्तमः पूजापरतन्त्रः अगस्त्यं दृष्ट्वापि निर्लक्ष्यभावपूरितः अगस्त्येन प्राप्तनीचगजयोनिजननशापः विष्णुसेवया शापोपशमनं प्राप्य जलाशये मरणं प्राप्य बुद्धः विष्णु स्तुत्या मुक्तः आसीत्। गजेनद्रमोक्षणकथा महा भागवतस्थ प्रसिद्धा। आकाशगामिन्या। मणिमात्रा उच्छिष्टं उग्रतपोनिमग्ने अगस्त्ये प्रमादात् पातनात् अगस्त्येन शप्तः सौगन्धिकापहरणसमये भीमेन हतः। महाभारते शान्तिपर्वणि अगस्त्यसंहिता सुप्रसिद्धा। अगस्त्येन आदित्यकवचं, आदित्यस्तोत्रं सुप्रसिद्धं भवति। नक्षत्ररूपागस्त्यस्य लोपामुद्रायाः प्रार्थनया इष्टकार्यसिद्धिः मोक्षप्राप्तिश्च भवेत्। ''जलकालुष्यनिवारक कतकफलरूपः अगस्त्यः इति लोक प्रसिद्धि र्वते''।





ग्रन्थसमीक्षा

वैखानसागमः

आगमेषु वैखानसागमस्वरूपं कीदृशं? वैखानसागमग्रन्थाः के वैखानसतत्त्वं किं? वैखानसक्रियाः कीदृशाः, वैखानसागमसम्बद्धाः आलयाः के के सन्ति इत्यैतैः अंशैः विलिखितः ग्रन्थः वैखानसागमः।

ग्रन्थकर्त्री कुमारी लिङ्गारेड्डि उमामहेश्वरी, सम्पादकः आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः प्रकाशकः डा.सोमनाथदासः। संस्कृताग्रिमगवेषणाप्रतिज्ञापनं पूरी द्वारा २०२५ वत्सरे मुद्रितः, अस्य मूल्यं तावत् १००/- रुप्यकाणि।

ग्रन्थानां आवश्यकता अस्ति चेत् ९४९०७४१४१४ द्वारा सम्पर्कः करणीयः।

हनुमान् चालीसा



12-05-2026 हनुमज्जयन्तीसन्दर्भं पुरस्कृत्य सप्तगिरिपाठकेभ्यः समर्प्यमानं हनुमान् चालीसा गीतम्। हनुमत्स्मरणात् सद्बुद्धिः, सत्कीर्तिः, महद्देहबलं, धैर्यं, निर्भयत्वं, अस्वास्थ्यं, अजडत्वस्थितिः वाक्पटुत्वं सम्भवन्ति। इदं महत्प्रयोजनं अशेषजनाय प्रापयितुं सत्सङ्कल्पेन पत्तू तुलसीदासः, हनुमान्चालीसां रचयामास। एतस्य नित्यपारायणात् भक्तेभ्यः सर्वशुभंजयश्च भवेदिति सप्तगिरिपाठकमहाशयेभ्यः प्रत्येकतया हनुमान् चालीसा प्रदीयते। हनुमज्जयन्तीसन्दर्भं पुरस्कृत्य हनुमद्भक्तेभ्यः सर्वेभ्यः शुभाकांक्षाः!!

''भयनाशः, कार्यसिद्धिः, सर्वकार्यविजयश्च सर्वे लभेयुः''

श्रीगुरुचरणसरोजरजनिजमनुमुकुरसुधारि
वरनौरघुवरविमलयशजोदायकुफलचारि।
बुद्धिहीन तनुजानिकैसुमिरौ पवनकुमार्
बलबुद्धि विद्यादेहुमोहि हुरहुकलेश विकार्।।

भावः - १. श्रीगुरुचरण कमलरजसा मन्मनोनामक मुकुरं शुभ्रं कृत्वा धर्मर्थकाममोक्षान् चतुर्विधपुरुषार्थान् प्रदातारं श्रीरामचन्द्रविमलकीर्तिं वर्णयामि।

भावः - २. इदं शरीरं बुद्धिहीनतया जातमिति ज्ञात्वा पवनकुमारं स्मरामि। सः मम बलं बुद्धिं विद्यां ददातु। कामादिविकारजातक्लेशानपि परिहरतु।

चौपायी

१. जयहनुमान ज्ञानगुणसागर।
जयकपीशतिहुलोक उजागर।।

भावः - ज्ञानगुण सागरस्य तव जयो भवतु। लोकप्रकाशककपीश! तव जयोभवतु।

२. रामदूत अतुलितबलधामा।
अञनि पुत्र पवनसुत नाम।।

भावः - हे रामदूत! अतुलित बलनिलय। अञनीसुत! पवनसुतनामक।

३. महावीरविक्रम भजरङ्गी।
कुमतिनिवार सुमतिके सङ्गी।।

भावः - महावीर! विक्रमस्वरूप! वज्रशरीर! कुमतिनिवारक! सद्बुद्धियुतानां सहकारिन्!

४. कञ्चनवरणाविराजसुवेशा।
काननकुण्डल कुञ्चितकेशा।।

भावः - स्वर्ण शरीरछायाविराजमान! सद्वेषेण प्रकाशमान! कर्णयोः कुण्डल धारिन्! कुञ्चितशिरःकेश!













५. हाथवज्र औरध्वजाविरजै।
कन्धेमूञ्ज जनेवू साजै।।
भावः - हस्तेवज्रधारिन्! अञ्जनीसुत! ध्वजेनविराजमान। स्कन्धेमुञ्जधारिन्, यज्ञोपवीतधारिन्।

६. शङ्करसुवनकेसरीनन्दन।
तेजप्रताप महाजगवन्दन।।
भावः - शङ्करपुत्र! (शिववीर्थाज्ञातः) केसरितनय! (अञ्जनीभर्ता केसरी) महातेजः प्रतापविशिष्ट! समस्तजगज्जनैः वन्द्यमान!

७. विद्यावानगुणी अतिचातुर!
रामकाजकरिवेको आतुर।।
भावः - सर्वविद्याविराजमान! कल्याणगुण! अतिचातुर्य विशिष्ट! रामकार्यनिर्वहणे आतुरत्वप्रदर्शक।

८. प्रभुचरित्र सुनिवेको रसिया!
रामलखनसीतामनबसिया।।
भावः - श्रीरामप्रभुचरितश्रवणरसिक! सीतारामलक्ष्मणान् मनोधारिन्।

९. सूक्ष्मरूपधरिसियहधिभावा!
विकटरूपधरि लङ्कजलाव।।
भावः - सूक्ष्मरूपं धृत्वा सीतया दृष्टोऽसि। विकटरूपं धृत्वा लङ्कादहनं कृतोऽसि।

१०. भीमरूपधरि असुर संहारे!
रामचन्द्रकेकाजः संवारा।
भावः - भयङ्ररूपं धृत्वा असुरसंहर्ता अभवः। रामचन्द्रकार्यं निर्वर्तितोऽसि।

११. लाय सञ्जीवन लखनजियाये।
श्रीरघुवीर हरसि उरवाये।।
भावः सञ्जीवनीमानीय लक्ष्मणंमूच्छोत्थितं सचेतनं कृतोऽसि। तेन संतृष्टः श्रीरामः त्वां हृदायालिङ्गनमकरोत्।

१२. रघुपतिकिन्ही बहुत बडायी।
कहा भरत समतुमप्रियभायी।।
भावः - श्रीरामचन्द्रमूर्तिः त्वां बहुधा प्रशंस्य सोदर। त्वं मम भरतसमानः जातोऽसीत्यवोचत्।

१३. सहस्रवदन तुह्मारोयशगावै।
अस कहि श्रीपतिकण्टलगावै।।
भावः - सहस्रदनैः त्वद्यशः गानं कृत्वा श्रीरामः त्वां आलिलिङ्ग।

१४. सनकादिकब्रह्मादिमुनीशा।
नारदशारदसहित अहीशा।।
१५. यमकुबेर दिगपाल जहाते।
कविकोविद कहिसकैकहाते।।
भावः - सनकादिदवेर्षयः ब्रह्मदिदेवताः, मुनीश्वराः, नारदः, सरस्वती, आदिशेषः यमकुबेरादिदिक्पालाः कवचः, पण्डिताः, इत्यादयः त्वद्यशोगानं कियदिति करिष्यन्ति।

१६. तुमउपकार सुग्रीव हि कीन्हा।
राम मिलाय राजपददीनहा।।
भावः - त्वं सुग्रीवाय उपकृतोऽसि। रामेण तस्य सख्यं कारयित्वा राज्यसम्पत् दापितोऽसि।

१७. तुम्हरो मन्त्र विभीषण माना।
लङ्केश्वर भय सऐ जग जाना।।
भावः - त्वदालोचनानि विभीषणः अङ्गीकृत्य लङ्काराजा बभूवेतीयं सङ्गतिः लोक विदितेव।

१८. युगसहस्रयोजन परभानू।
लील्योताहि मधुरफलजानू।।
भावः - द्विसहस्रयोजन दूरस्थ सूर्यं मधुर फलत्वेन सम्भाव्य लीलया गृहीतोऽसि।

१९. प्रभुमुद्रिकामेलिमुख माहीं।
जलधिलांघिगये अचरज माहीं।
भावः - श्रीराममुद्रिकां वदने निवेश्य समुद्रलंघनं कृतोऽसि इति कथने किमाश्चर्यम्।

२०. दुर्गमराज जगतेकेजेते।।
सुगम अनुग्रह तुम्हरे तेते।।
भावः - कष्टं कार्यं जगति यद्वर्तते तत् त्वदनुग्रहात् सुगमं भविष्यति।

२१. रामदु अरे तुम रखवरे।
होत न आज्ञा बिनु पैठारे।।
भावः - त्वं रामद्वाररक्षकः, त्वदाज्ञया विना अन्तः गन्तुं न शक्यते।

२२. सबसुखलहै तुम्हारी शरणा।
तुम रक्षक काहको दरना।।
भावः - त्वच्छरणात् समस्त सुखानिलभेयुः. त्वयि रक्षके सति मम कस्मादपि भीतिः न स्यात्।

२३. आपनतेज सम्हारो आपै।
तीनोऽलोक हाङ्क ते काम्पे।।
भावः - त्वंत्तेजःप्रदर्शकः, उपसंहर्ता च त्वमेव। तव एकविजृम्भणशब्दात् त्रयः लोकाः कम्पन्ते।

२४. भूतपिशाच निकट नहि आवै।
महावीर जबनाम सुनावै।।
भावः - हे महावीर! तव नामश्रवणात् भूतप्रेतपिशाचाः न समीपमागमिष्यन्ति।

२५. नासैरोग हरै सुए पीरा।
जपत निरन्तर हनुमतवीर।।
भावः - निरन्तर वीरहनुमान्नामजपात् समस्तरोगाः समस्तपीडाः नश्यन्ति।

२६. सङ्कटसे हनुमानच्छुडवै।
मनक्रम वचन ध्यान जो लावै।।
भावः - मनोवाक्कायैः यः हनुमद्ध्यानं करोति सः समस्त सङ्कटेभ्यः दूरो भवति।

२७. सब पर रामतपस्वी राजा।
तिरके काज सकल तुम साजा।।
भावः - श्रीरामः सकलपभूपतीनां मकुटाय मानः तापसेभ्यः सर्वेभ्यः प्रभुतुल्यः। तस्य सर्वाणि कार्याणि त्वं निर्वर्तयसि।

२८. और मनोरथ जो कोयी लावै।
सोयि अमितजीवन फलपावै।।
भावः - यस्य कस्यापि यः कोपि मनोरथः पूर्णोभूत्वा तस्य जीवनसौख्यमनन्तं लभ्यते।

२९. चारो युग परताप तुम्हारा।
है पर सिद्ध जगत उजियारा।।

























भावः - तव प्रतापः चतुर्युगेषु वर्तते इति कथनं प्रसिद्ध मेव। तव प्रतापेन जगत् उज्ज्वलं भाति।

३०. साधुसन्तके तुमरखवारे।
असुरनिकन्दन राम दुलारे।।

भावः - त्व सधुजनरक्षकः भवसि। असुरान् हत्वा रामप्रियोऽभवः।

३१. अष्टसिद्धि नवनिधिके दाता।
असवर दीनजानकी माता।।

भावः - अणिमा महमाचैव गरिमा लधिमा तथा। प्राप्तिः प्रोकाम्यमीशत्वं वसित्व ऋाष्टभूतयः। इति निर्दिष्टाष्टसिद्धीः नवनिधीन् दास्यसीति वरं त्वं सीतायाः प्राप्तोऽसि।

३२. रामरसायन तुम्हारे पासा।
सदा रहै रघुपतिके दासा।।

भावः - रामरसायनं तवाधीनम् वर्तते। त्वं रामचन्द्रस्य श्रद्धालुः दासः असि।

३३. तुम्हारे भजन रामको पावै।
जन्मजन्मके दुःख बिसरावै।।

भावः - तव प्रार्थनया श्रीरामः सन्तुष्यति। जन्मान्तर दुःखानि नश्यन्ति।

३४. अन्तकाल रघुपति पुरजायी।
जहाजन्म हरिभक्तकहायी।।

भावः - ते भक्ताः यत्र कुत्रापि जाताः अपि हरिभक्ताः इति आहूयन्ते। अन्ते श्रीराममोक्ष धाम प्राप्स्यन्ति।

३५. औरदेवताचित्त न धरयी।
हनुमतसेयी सर्वसुखकरयी।।

भावः - अन्यदेवतानामानि चित्ते अधृत्वा हनुमत्सेवया सर्वसुखानि यः कोऽपि प्राप्स्यति।

३६. सङ्कटहटै मिटैसबवीरा।
जोसुमिरै हनुमतबलवीरा।।

भावः - बलवीरस्य हनुमतः नाम स्मरणात् सर्वसङ्कटाः पीडाक्लेशाः नश्येयुः।

३७. जै जै जै हनुमानगोसायी।
कृपाकरो गुरुदेव की नायी।।

भावः - हनुमत्प्रबोः जय जयध्वनिमीताः।
श्रीगुरुदेवत् कृपां प्रदर्शय।।

३८. जोशतबार पाठकर कोयी।
छूट हिबन्दि महासुख होयी।।

भावः - इदं स्तोत्रं यः शतपर्यायं पठेत् तस्य संसारबन्ध विमुक्तिः भवेत्। सः सर्वसुखानि च प्राप्स्यति।

३९. जो यह पडै हनुमान चालीसा।
होय सिद्धि साखी गौरी सा।।

भावः - हनुमान्चालीसा स्तोत्रं यः पठेत् तस्य पार्वती परमेश्वर साक्षितया सिद्धिर्भवेत्।

४०. तुलसीदास सदा हरि वेरा।
कीजैनाय हृदय महाडेरा।।

भावः - तुलसीदासः सदा हरिदासः एव। हे नाथ त्वं मम हृदये भव।

पतिव्रताशिरोमणिः गान्धारी

- डा. एन्.गुणवती, चरवाणी - ८९१९६२०२२६

महाभारतेतिहासे प्रमुखपात्रधारिणी गान्धारी। अस्याः आध्यात्मिककौन्नत्यं सर्वप्रशंस्यम्। शकुनेः सोदरीयं गान्धारदेशाधीशस्य सुबलमहाराजस्य पुत्री। हस्तिनापुरान्धराजस्य धर्मपत्नी इयं गान्धारनगरसम्बन्धिनीति गान्धारीति कौरवमातेति च व्यवह्रिमाना आसीत्। धृतराष्ट्रं पतिं स्वीकृत्य भर्तुः अन्धत्वात् पतिव्रताधर्माबलम्बिनीयं स्वयं सर्वजनप्रकृतिदर्शनविमुखी नयनाच्छादनवस्त्रं धृतवती। कुरुराज्याग्रजयुवराजं पतिं प्राप्य महोन्नतव्यक्तित्वं प्रदर्शितवती। धर्मपरा अङ्कित भावेन भर्तारमनुसरन्ती। अस्याः विवाहः भीष्ममहाशयेन कारितः। अन्धं परिणेतुं हेतवः यत्र कुत्रापि इतिहासे न प्रदर्शिताः। अस्याः अकलङ्कप्रेमचिह्नं नयनाच्छादनवस्त्रं महादर्शप्रायम्।

महाशिवभक्तेयं तपःसम्पन्ना शिवं साक्षात्कृतवती शतसन्ततिं प्राप्तुं शिवात् वरं प्राप्तवती। एतत्कारणादेव भीष्मः गान्धारीं कुरुवंशपट्टमहिषीञ्चकारेति प्रतीतिः।अन्येष्वपि गान्धारी अत्युत्तमप्रेम प्रदर्शितवती। अत एव सन्तुष्टः वेदव्यासः तस्याः गर्भविच्छित्तिकारणात् बहिरागतपिण्डं रक्षयित्वा शतपुत्रजन्मकारणं बभूव। गर्भवत्यपि गान्धार्याः वर्षद्वये अतीतेऽपि प्रसवः न सञ्जातः। परन्तु कुन्ती पुत्रान् प्रसूतवतीति, गान्धारी दुःखवशेन स्वौदरोपरि प्रहारञ्चकार। मुष्टिघातात् अण्डः भूमौ पपात। वेदव्यासः विषयमेनं ज्ञात्वा तदेवाण्डं १०१ भागात्वेन विभज्य घृतकुण्डे निवेशयामास। ततः वर्षद्वयानन्तरं अण्डात् शतसंख्याकपुत्राः एका पुत्रिका बहिरागताः। आदौ दुर्योधनः पश्चात् ९९ कुमाराः पश्चात् एका कुमारीति इत्थं बहिरागताः। दुर्योधनजननानन्तरमेव बह्वशुभशकुनानि सम्भूतानि। भीमहस्ते दुर्योधन मरणात् कुरुवंशनाशानन्तरं गान्धारी नयनाच्छादनवस्त्रं अपनीय पाण्डवान् द्रष्टुमयाचत। तस्याः दृष्टिः धर्मराजे पतेदिति कृष्णः जागरुकतया तं दूरमपससार। तथापि पादाङ्गुल्यां पतनात् तस्याः पातिव्रत्यप्रभावात् तदङ्गुली महातापात् कालवर्णं प्राप्ता।



गान्धारी स्वपुत्रं द्रष्टुं नायनाच्छादितवस्त्रमपनातवती। तं स्वपुत्रं नग्नतयाद्रष्टुमाज्ञापितवती। परन्तु दुर्योधनः लज्जया शरीरमध्यप्रदेशं वस्त्राच्छादनरहितञ्चकार। अत एव तस्य शरीरे मध्यभागेन विना शिष्टं सर्वं तस्याः पातिव्रत्य प्रभावात् अभेद्यं दृढं सञ्जातम्। गान्धारी युद्धे स्वपुत्रमरणात् महद्दुःखमनु बभूव। गान्धारी पाण्डवेषु क्रोधयुक्ता वर्तते इति ज्ञात्वा व्यासः ''गान्धारि! तव क्रोधमुपसंहर, युद्धाय गमनात्पूर्वं दुर्योधने मातुः आशीर्वादार्थं आगते तदा ''यत्र धर्मः तत्र विजयः'' इति त्वया प्रोक्तम्। तव पुत्रस्य अधर्मप्रवर्तनं त्वया ज्ञातमेव। पाण्डवैः केवलं पञ्चग्रामाः एव राज्य भागत्वेन दीयतामलमिति प्रोक्तम्। तदा दुर्योधनतिरस्कारः तव बाधाकरः न जातः वा? सभायां तवपुत्रेण दौपद्याः अवमानकरणं तव बाधाजनकमासीदिति वयमपि जानीमः। तव आशीर्वादमनुसृत्यैव पाण्डवानां युद्धे विजयः प्राप्तः। द्रौपदीकृतप्रतिज्ञामनुसृत्यैव दुश्शासनस्य रक्तपानं हननं मयाकृतमिति भीमेन समाधत्तम्। (अनुवर्तते १८)



वज्रदेहजयन्ती
हनुमज्जयन्ती

- डा.के.कोटेश्वरय्य
चरवाणी - ९९८५१२३२६२

मनोजवं मारुततुल्यवेगं जितेंद्रियं बुद्धिमतां वरिष्ठम्।
वातात्मनम् वानरयूधभमुख्यं श्रीरामदुतं शिरसानामामि।।

श्रीरामभक्तस्य हनुमतः जन्मदिननिर्वाहक वैभवोपेतपर्वदिनं २०२६ वर्षे, मे मासे १२ तिथाविकालमान पट्टिकायां निर्दिष्टम्। वायुदेवपुत्रः हनुमान् अत्यद्भुतशक्तिधैर्येमहाविज्ञानीति प्रसिद्धः। नवविधभक्तीनां दास्यभक्तियुतः अयं। रावणापहृतसीतान्वेषणे साफल्यं, लङ्कायां अशोकवनस्थ सीतापरिज्ञाननैपुण्य समुद्रलंघनधैर्यमाहासा हसयुक्तिप्रदर्शनमित्यदिकार्याणि हनुमन्महत्त्व प्रसिद्धेः कारणानि। वज्रदेहः हनुमान्। हनुमज्जयन्ती पर्वदिन सन्दर्भे वेद्यप्रसादसमर्पणप्रार्थनापूजानिर्वहणादयः प्रधानकार्याणि भवन्ति। हनुमज्जयन्तीनिर्वहणं भगवति अचञ्चल भक्तेः प्रामुख्यं निरूपयति। हनुमान् यावज्जीवं निस्स्वार्थसेवकः दास्य भक्तेः उत्तमोत्तमनिदर्शकः भवति। रामरावण युद्धे हनुमत्साहाय्यमनिर्वणनीयम्। हैन्दवेषु हनुमज्जयन्ती धार्मिकताध्यात्मिकतासद्गुणावलम्बकत्वनिस्स्वार्थसेवागुणा वश्यकत्वं समाजसेवाप्रामुख्यं बोधयति। पद्मपुराणमनुसृत्य -

कदाचिदञ्जनादेवी सूर्यारधनाय गत्वा तस्य तापात् स्वल्पखण्डं स्वमुखे निवेशितवती। सः तापखण्डः एव हनुमान्। बल्यादेव बुद्धिमान् शक्तिमान् सूर्यचन्द्रग्रहौ स्वोपाध्यायत्वेन सम्भाव्य विद्यामधीतवान्। सर्ववेदशास्त्राध्ययनात् सर्वशास्त्र निष्णातः बभूव।

श्रीरामगुणपराक्रमान् ज्ञात्वा अपारभक्तियुतः रामदर्शनार्थमयोध्यां जगाम। लङ्कादाहः हनुमतः महत्कार्यम्। अयं स्ववालं लङ्कादाहसत्कायायैव उपयुयोज।

हनुमज्जयन्ती दिने हनुमच्चालीसा श्लोक पठनात् भक्ताः हनुमदाशीर्वादं प्राप्स्यन्ति। गुडकदल्यादिफलानि, रक्तवर्णपुष्पाणि मोदकानि, शर्करा, इत्यादीनि हनुमते नैवेद्यतया समर्पणीयानि। ओं हनुमते नमः इत्यादिमन्त्र स्तोत्रश्लोकाः जयन्तीदिने पठनीयाः। कर्पूरनीराजनं कर्तव्यम्। हनुमज्जन्मधिकृत्य भिन्नकथाः -

हनुमतः जन्म अधिकृत्य पुराणेषु भिन्नभिन्नवृत्तान्ताः दृश्यन्ते।

१. मोहिनीरूपे विद्यमानविष्णुदर्शनात् शिवस्य वीर्यस्रावे जाते सप्तर्षयः तद्वीर्यं गृहीत्वा अञ्जनागर्भे प्रवेशयामासुः। तद्गर्भात् हनुमानजायत इति शिवपुराणवचनम्।

२. दशरथः पुत्रकामेष्टियागं कृत्वा यज्ञफलं स्वभार्याभ्यः ददौ। तस्मिन् समये एकः काकः किञ्चिदूभागं स्वनासेन गृहीत्वा आकशे गच्छन्नासीत्। तदा तथत्फलं अञ्जनहस्ते अपतत्। सा तद्यज्ञफलं भुक्तवती। तदा तद्ययज्ञफल शक्त्या गर्भवती भूत्वा हनुमतः जन्म ददाविति आनन्दरामायण कथा -

३. शिवेन अञ्जनादेवीभर्ता केसरी आवाहितः। ततः अञ्जनाकेसरीसम्पर्कः बभूव। वायुनापि स्वशक्तिः केसरिशरीरे प्रवेशकरणात् अञ्जनागर्भधारणात् हनुमानजायत इति भविष्यपुराणवचनम्।

४. **पार्वती परमेश्वराभ्यां वानररूपे कामक्रीडा** - शिवेन स्वयोग शक्त्या पार्वती गर्भवीर्यस्य वायोः समर्पणात् वायुना तद्वीर्यस्य अञ्जनागर्भे प्रवेशकरणात् हनुमानजायत। बृहस्पतिसेविका अप्सराकेलीकलापदर्शनकामुकतया बृहस्पतिं दृष्ट्वा तच्चुम्बनात् कुपितेन तेन वानरो भव इति शापप्रयोगात् शापविमोचनप्रार्थनया शिवशक्त्या पुत्रजन्मानन्तरं शापविमोचनं भवेदिति बृहस्पतिकथनम्। ततः अञ्जना वानरजन्मनि केसरिणं परिणीय शिववीर्यात् गर्भं दधार।

दाराः रक्ष्यतमाः सदा। दानं हि महती क्रिया।

शिवशक्तिसम्पन्नः पुत्रः अञ्जनागर्भाज्जनिष्यतीति वालिः नारदात् ज्ञात्वा पञ्चविधमूलिकानां अञ्जनागर्भे निवेशात् गर्भस्रावप्रार्थनया मूलिकाशक्त्या बलाढ्यः हनुमानजयतेति कम्बरामायणम्।

५. नामकरणम् - रामायणमनुसृत्य - हनुमज्जननादेव शापविमुक्ता अञ्जना स्वर्गलोकं जगाम। जातः हनुमान् मातरं आहारमयाचत। सा रक्तफलानि दर्शयामास रक्तवर्णसूर्यः एव फलमिति सूर्यसमीपगमनात् तत्रस्थ राहोपरि, ततः ऐरावतोपरिपतनात् इन्द्रेण वज्रायुधप्रयोगात् हनुमान् भूमावपतत्। वायुः हनुमन्तं पातालं निनाय।वायुना पाताललोकगमनात् भूमौ वाय्वभावात् सकलचराचरप्राणिनः वायुं सान्त्वयित्वा तत्तनयं सजीवं चक्रुः। पुनरुज्जीवितपुत्रस्य हनुमान् इति नामकरणं कृत्वा इन्द्राग्न्यादिदेवताः बहुवराणि ददुः।

विद्याभ्यासः - अयं सर्वदेवशास्त्राणि सूर्यादधीतवान्। गुरुदक्षिणारूपेण मत्पुत्रः सुग्रीवः सोदरात् काले बलहीनः स्यात्। सदा सुग्रीवसहायकः त्वं भवेति सूर्यप्रार्थनया सर्वदा हनुमान् सुग्रीवस्नेहबद्धः आसीत्। सीतापहरणानन्तरं रामदर्शनात् श्रीरामसेवकः सन् राम सहाय्यात् सुग्रीवं किष्किन्दाधिपतिं कृत्वा सुग्रीवामात्यो बभूव। अयं युद्धे बहून् असुरान् जघान। सञ्जीविनीपर्वतमानीय लक्ष्मणं मूर्छोत्थितं चकारेति रामायणकथा -

६. महाभारतकथा - चिरञ्जीवी हनुमान् - रामावतारनन्तरं वृद्धावस्थायां कदलीवने सौगन्धिकापुष्पमानेतुं गच्छन्तं भीमं पराजितश्चकार। अर्जुनरथस्य पताकत्वेन श्रीकृष्णोपदेशात् स्थित्वा युद्धानन्तरं तस्माददृश्यः बभूवेति।

महाभारत कथा ... हनुमान् सूर्यात् सर्वशास्त्रैः सह उपनिषद्भिः सह व्याकरणशास्त्रे महानैपुण्यं सम्पादयाया स। अत एव रामायणे सुग्रीवप्रेषितः हनुमान् आत्मनः सुग्रीवस्य च परिचयं कुर्वन् वाक्योषु शब्दोच्चारणे व्याकरणशास्त्रप्रवीण्यं प्रदर्शयामासेति श्रीराम एव लक्ष्मणमुद्दिश्य प्राह। नवव्याकरण पण्डितः अयं सूर्यात् विद्याभ्यासानन्तरं कृतज्ञतामाविष्कृत्य-

उदये ब्रह्म रूपो मां मध्याह्नेतु महेश्वरः
सायङ्काले स्वयं विष्णुः सन्ध्यदीप नमोस्तु ते इति वदन् स्वाश्रमञ्जगाम। ईश्वरांशसम्भूतः वशीकृताष्टसिद्धप्रभावः। अयं वायुदेवानुग्रहात् गरुत्मानिव शतयोजनविस्तीणं समुद्रमवलीलया अलंघयत्।समुद्रात् बहिरागत्य विश्रान्ति स्वीकरणाय प्रार्थितं मैनाकमभिनन्द्य रामकार्ये कर्तव्यनिष्ठायां आलस्यं माभूतिति मैनाकं केवलं स्पृष्ट्वा स्वप्रायाणमविच्छिन्नञ्चकार।

आपदुद्धारकहनुमत्स्तोत्रम् -

१. वामे करे वैरिभिदां वहन्तं, शैलं परे श्रृंखलहारिटङ्कम्।
दधानमच्छच्छन्मियज्ञसूत्रं भजेज्वलत्कुण्डलमाञ्जनेयम्।।
२.संवीतकौपीनमुदञ्चिताङ्गुलिं समुज्ज्वलन्मौञ्जिमयोपवीतिनम्।
सकुण्डलं लम्बशिखासमावृतं तमाञ्जनेयं शरणं प्रपद्ये।।
३.अत्राखिललोकार्तिहारिणे श्रीहनुमते।
अकस्मादागतोत्पातनाशनाय नमो नमः।।
४. सीतानियुक्त श्रीरामशोकदुःखभयापह।
तापत्रितयहारिन् आञ्जनेय नमोनमस्ते।।
५. आधिव्याधिमहामारिग्रहपीडापहारिणे।
प्राणापहर्त्रे दैत्यानां रामप्राणात्मने नमः।।
६. संसारसारावर्तकर्तव्यभ्रान्तचेतसां।
शरणागतमर्त्यानां शरण्याय नमोऽस्तुते।।
७. वज्रदेहाय कालाग्निरुद्रायामिततेजसे।
ब्रह्मास्त्रस्तम्भानायास्मै नमः श्रीरुद्रमूर्तये।।
८.रामेष्टं करुणापूर्णं हनुमन्तं भयापहम्
शत्रुनाशकरं भीमं सर्वाभीष्टप्रदायकम्।।
९.कारागृहे प्रयाणे वा संग्रामे शत्रु सङ्कटे।
जलेस्थले तथाकाशे वाहनेषु चतुष्पथे।।
१०. गजसिंहमहाव्याघ्रचोरभीषणकानने।
ये स्मरन्ति हनूमन्तं तेषां नास्ति विपत्कचित्।।
११. सर्ववानरमुख्यानां प्राणभूतात्मने नमः।
शरण्याय वरेण्याय वायुपुत्राय ते नमः।।
१२.प्रदोषे वा प्रभाते वा ये स्मरन्त्यञ्जनासुतम्।
अर्थसिद्धिं जयकीर्तिं प्राप्नुवन्ति न संशयः।।
१३. जप्त्वा स्तोत्रमिदं मन्त्रं प्रतिवारं पठेन्नरः।
राजस्थाने सभास्थाने प्राप्ते वादे लभेज्जयम्।।
१४.विभीषणकृतं स्तोत्रं यः पठेत्प्रयतो नरः।
सर्वापद्भ्यः विमुच्येत नाऽत्रकार्या विचारणा।।

मन्त्रः - मर्कटेश! महोत्साह! सर्वशोकनिवारक!
शत्रून् संहर मां रक्ष श्रियं दापय भो हरे।।



विभीषणकृतं सर्वापदुद्धारकं श्रीहनुमत्स्तोत्रम्।

हनुमन्माहात्म्यपरकश्लोकाः -

१. गोष्पदीकृतवाराशिं मशकीकृतराक्षसं।
रामायणमहामालारत्नं वन्देऽनिलात्मजम्।।
२. अञ्जनानन्दनन्दनं वीरं जानकीशोकनाशकं।
कपीशमक्षहन्तरं वन्दे लङ्काभयङ्करम्।।
३. सुन्दरे सुन्दरो रामः सुन्दरे सुन्दरी कथा
सुन्दरे सुन्दरी सीता सुन्दरे सुन्दरं वनं।।
४. सुन्दरे सुन्दरं कायं सुन्दरे सुन्दरः कपिः।
सुन्दरे सुन्दरं मन्त्रं सुन्दरे किं न सुन्दरम्।।

हनुमद्व्रतम् - मार्गशिर शुद्धत्रयोदश्यां हनुमद्व्रतमाचरन्ति। पम्पानदीतीरे वा कलशे पम्पाजलमावाहयन्ति। १३ सूत्रबन्धतोरणं पूजयित्वा मन्त्रोच्चराणेन हस्ते धारयन्ति। व्रतकथाः पठित्वा नैवेद्यं समर्प्य प्रसादं स्वीकुर्वन्ति। तस्मिन्नेव दिने लङ्कायां सीतां हनुमान् ददर्शेति वदन्ति। हनुमद्व्रतदिने हनुमदर्चनात् समस्तदुःखपरिहारः, अभीष्टवांछितसिद्धिः सर्वसम्पत्प्राप्तिर्भवेदिति विश्वासः। रावणसंहारात् पूर्वं श्रीरामः। द्रोपदीकृष्णादेशात् अरण्याज्ञातवासनिर्विघ्न परिसमाप्तये, कौरवपाण्डवयुद्धे पाण्डवेभ्यः जयप्राप्तये हनुमद्व्रतमाचर्य सफला बभूवुः। हनुमज्जयन्ती वैशाखमासे कृष्णपक्षे दशम्यां इति शनिवारे हनूमानजयत इति भावयन्ति। अस्मिन्नेवदिने हनुमज्जयन्त्युत्सवं निर्वाह्य हनुमतः कदलीवनप्रियत्वात् कदलीवृक्षैः आलयानलङ्कुर्वन्ति। तस्मिन्नेवदिने हनुमतः सदा नागवल्लीपत्रपूजाभीष्टत्वात् अशेषनागवल्लीपूजभिः भक्त्या तं पूजयन्ति। गुडपानं, वाटिका अपूपानि नेवेद्यत्वेन समर्प्य प्रसादत्वेन पूजकाः स्वयं स्वीकुर्वन्ति तस्मिन्नेव दिने हनुमत्सुवर्चालाकल्यणं वैभवोपेततया निर्वाह्य ग्रामोत्समपि निर्वाह्य सर्वेभ्यः तद्दर्शनभाग्यं कल्पयन्ति। आम्रफलकालत्वात् आम्रफलैः, गन्धसिन्दूरेण नागवल्लीपत्रैः त्रयाह्निकत्वेन पूजाविधानाचारः वर्तते। मोदकप्रियत्वात् हनुमतः मोदकान्यपि नैवेद्यतया समर्पयन्ति।

(१५ पुटतः)

पतिव्रताशिरोमणिः गान्धारी

पञ्चपुत्रेषु हतेषु कुन्त्या सह गान्धार्यपि द्रौपदीं सान्त्वयामास। हे कृष्ण! त्वामहं शपामि कौरव पाण्डवान् युद्धविमुखान् कर्तुं शक्तोऽपि त्वं तत्कार्यं मनःस्फूर्त्यानकृतोऽसि।यथा कौरवपाण्डवाः परस्परहननं कृतवन्तः तथैव यदुवंशस्थाः सर्वेऽपि परस्परहननात् मृताः स्युः। त्वमपि सामान्यरीत्या प्राणान् त्यक्ष्यसि इति गान्धारी कृष्णं शशाप। कृष्णोऽपि मन्दहासेन गान्धारीकृतशापस्य स्वागतं ददौ। धृतराष्ट्रः ''मम गान्धार्यपि दुर्योधनदुष्टबुद्धिं दूरीकृतौ इति धृतराष्ट्रं एकवारं निन्दाञ्चकार। धृतराष्ट्रः पञ्चदशवर्षानन्तरं अहमद्य पापप्रक्षालनाय दिने एकवारमेव भोजनमपि स्वीकरोमि। गान्धार्यपि मया सह भूशय्यमाश्रितवती। धृतराष्ट्रः गान्धार्यादिभिः सह वनं प्रतस्थे। हिमालयेषु गान्धारी धृतराष्ट्रविदुरकुन्तीभिः सह अग्निप्रमादे दग्धा मोक्षमवाप। धर्मराजः शास्त्रोक्तविधिना गङातीरे ससोदरः तेभ्यः अत्यक्रियाः निर्वर्तयामास।

गान्धारी, वरः अन्धः इति ज्ञात्वापि, स्वयं गान्धारदेशाधीशसुबलमहाराज पुत्र्यपि धृतराष्ट्रमेव पतित्वेन वृणीतवती। दृष्टिहीने पतौ मम दृष्टिः मास्तु इति यावज्जीवं वस्त्राच्छदितनयना पतिमेवानुसरन्ती भर्तुः धार्मिकसूचनाः दधन्ती कालं यापितवती। रजस्तमोगुणदूरा सती महाभाते उत्तमोत्तमपतिव्रतारत्नमिति विख्यातिमवाप।

दीर्घसूत्री विनश्यति, दुरवगाह्या गतिर्दैवस्य।



तिरुपति गोविन्दराजस्वामिभ्यः ब्रह्मोत्सवः

- डा. पि.माधवी
चरवाणी - ८५१९८०४७८४

अस्मिन्वर्षे २३.०५.२०२६ आरभ्य ३०.०५.२०२६ पर्यन्तं नवदिनेषु तिरुपति गोविन्दराजस्वामिने ब्रह्मोत्सवाः प्रचलिष्यन्ति। पाद्मसंहितायां उत्+सवः उत्सवः। सव नाम प्रपञ्च दुःखनिवारणर्थं क्रियमाणोत्सवः इति प्रश्नसंहितायां उत्सूते हर्षं भगवतः इत्युत्सवः, समूर्तार्चनाधिकारे उत्कृष्टयज्ञत्वात् उत्सवः इति अत्रिमहर्षिवचनम्। विष्वक्सेन संहितायां सवः नाम शुभमिति अशुभ निवारणाय क्रियमाणोत्सवः इति भिन्नभिन्ननिर्वचनानि प्रोक्तानि। ब्रह्मणा निर्वाह्यमानोत्सवः ब्रह्मोत्सवः। नवदिनेषु स्वामिने वाहनसेवाः पवर्तन्ते। बृहच्छेषवाहनं, लघुशेषवाहनं, हंसवाहनं, सिंहवाहनं, मौक्तिकपन्दिरीवाहनं, कल्पवृक्षवाहनं। ''सर्वभूपालवाहनं, पल्यङ्कवाहनं (पल्लकीवाहनं, मोहिन्यवतारः) गरुडवाहनं, हनुमद्वाहनं, गजवाहनम्, सूर्यप्रभावाहनं, चन्द्रप्रभावाहनं, रथोत्सवः, अश्ववाहनं, पल्लकी-उत्सवः, चक्रस्नानं, तिरुच्चि उत्सवः, ध्वजावरोहणं पूर्णकुम्भप्रोक्षणं (नवकुम्भारोपणं इति नववाहनसेवाः।

ध्वजारोहणम् - देवताह्वानाय स्वामिवाहनचिह्न गरुत्मच्चित्रपटं मन्त्रतन्त्रगद्यपद्यस्तोत्रसमायुक्तत्वेन शुभमुहूर्ते ध्वजस्तम्भाग्रभागं प्रेषयित्वा तद्वारा ब्रह्मलोकादिलोकदेवानां आह्वानाय ध्वजारोहणम्। ध्वजारोहणकार्यक्रमादारभ्य ध्वजावरोहण पर्यन्तं उदये सायङ्काले च होमः प्रवर्तते। नित्यं उभयवेलासु यागशाले नित्याग्निकुण्डे आलयद्वारदेवद्वारपालविमान पालादिदेवताभ्यः पञ्चसूक्तपारमात्मिकसर्वदैवत्यमन्त्रैः तत्समिधैः आज्येन नवदिनपर्यन्तं होमः प्रवर्तते। आचर्यार्चकाः ध्वजस्तम्भप्रतिष्टित गरुडाल्वारोः अभिषेकचन्दनलेप, पीताम्बरवस्त्र धारणम्, स्वामिधृतदीर्घपुष्पमालां गरुडचित्रपटे निक्षिप्य आम्रपत्राणि, दर्भाणि, कूर्चाणि, रज्जुना बध्वा पूजादि कार्यक्रमनिर्वहणानन्तरं गरुडचित्रपटं गद्यपद्यमन्त्रादिभिः शुभलग्ने ध्वजस्तम्भाग्रभागं मन्त्रपूर्वकं गरुडमुखात् देवताह्वानाय प्रेषयन्ति। गरुत्मन्निवेदितमुद्वान्नभोजनात् स्त्रियः बलारोग्ययुक्ताः पुरुषसन्तानं प्राप्स्यन्तीति भक्तानां विश्वासः। ध्वजारोहणानन्तरं स्वामिने वस्त्राणि धारयित्वा, स्नपनतिरुमञ्जनं निर्वहन्ति। ध्वजारोहणानन्तरं नवदिनपर्यन्तं होमः प्रवर्तते उभयवेलासु नवदिनपर्यन्तं बलिनिवेदनकार्यक्रमं निर्वहन्ति। दिने दिने ब्रह्मोत्सवेषु रात्रौ महावीथी प्रदक्षिणात्पूर्वं सायं स्वामिनः पट्टमहिष्या सह डोलाविहारं कारयन्ति। प्रथमदिने सायं समये श्रीदेवीभूदेव्योः अत्यन्तमनोहरतया ऊञ्जलूसेवां ६.३० आरभ्य ७.३० पर्यन्तं निवहन्ति।

वाहनवैशिष्टचम् - सप्तशीर्षवाहनम्, लघुशेषवाहनम् पञ्चशीर्षवाहनम्। गृहत्वेन शयनमन्दिरत्वेन छत्रत्वेन शेषः स्वामिकेङ्कर्य परायणेषु प्रथमः दास्यकैङ्कर्यमनोभावान् शेषवाहनोत्सवद्वारा प्रोत्साहयतीति ज्ञायते। ब्रह्मोत्सवे उभयशेषवाहनोपरि स्वामिनं दिनद्वयं वीथीषु भ्रामयन्ति। श्रीहरेः आदिशेषस्य मध्ये स्वामि सेवकसम्बन्धः वर्तते। निजसेवकः कथं भवितव्यः इति आदिशेष दर्शनात् सम्यक् ज्ञायते। महाविष्णुः आदिशेषे एव शयननिवासविश्रान्ति स्वीकरणानि करोति। उपकारस्मृतौ स्वामिनः वाहनत्वं महाच्चित्रं भाति। प्रपञ्चे देवस्य शेषभूतं नाम दासभूतत्वमेव। शेषवृत्तिः दास्यमेव। एवं शेषवृत्ति कारेषु आदिशेषः अग्रताम्बूलस्थानं वहति। सहस्रफणामण्डलैः भूमिं समतुल्यं कुर्वन् निरन्तरं शेषः भूभारं वहति। भूभारवहनसामर्थ्यं दृष्ट्वा चतुर्दशभुवनान्यपि स्वोदरेनिवेशन सामर्थ्यवान् हरिः स्वशरीरं क्षीरसागरे शय्यात्वेन बारं वहेति आदिशेषं आज्ञपयामास। द्वितीयदिने लघुशेषवाहनस्य उदये ७.०० घण्टातः आरभ्य ८.३० पर्यन्तं महावीथ्युत्सवः अत्यन्तवैभवोपेततया पर्नर्वाह्यते।

(अनुवर्तते)

चित्रकथा

श्लोकोऽयं प्राणरक्षकोऽभूत्

तेलुगुमूलम् - 'कलारत्न' डा.कम्पेल्ल रविचन्द्रन्
चित्राणि - श्री तुम्बलि शिवाजी
संस्कृतानुवादः - डा.के .सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०



दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्।


वैद्यः राज्ञः शस्त्रचिकित्साकरणात् पूर्वं रज्ञा, कुड्ये चतुदिक्सु लिखितं कृतं श्लोकमपठत्।
विषप्रभावत् राज्ञः शरीरं नीलवर्णं स्यात्। विषप्रभावः इति सर्वेषां ज्ञातं स्यात्। तदा मम मरणदण्डः स्यात् अतः विषक्षुरिकामन्यत्रनिक्षिप्य सच्छुरिकया शस्त्रचिकित्सां करिष्यामि।
वैद्य! किमर्थं छुरिकापरिणामः कृतः।
राजन् किमपि नास्ति।
अवि कर्तव्यम् सुवि
किमर्थमयं सन्दिग्धो भवति वक्तुम्। वास्तवं ज्ञास्यामि।
राजवैद्यः पेटिकास्थ छुरिकां बहिर्नीत्वा क्षीरमग्नश्चकार। झटित्येव क्षीरं नीलज्ञातम्।
हे वैद्य! किमर्थमिदं कृतम्?
महाराजन्! क्षम्यताम् धनाशया तृणबुद्ध्या एवं कृतोऽस्मि। दयया मां राजद्रोहिणं कारागारबद्धं माकुरु। देशं परित्यज्य गमिष्यामि।
अविचार्यन कर्तव्यं
कृतवञ्चना बहिर्गता।
हे भटाः! अत्याशया मां हन्तुं उद्युक्तं ..... न ....न इमं द्रोहिणं बध्नन्तु
सुविच
अविचार्यन कर्तव्यम् कर्तव्यं सुविचारितम्।
साहित्यशक्तिरद्वितीया। अहो अद्य महा कविश्लोकः एव मत्प्राणपरित्राता बभूव। हे महाकवे धन्योऽस्मि।

मे 2026 द्वादशराशीनां मासफलानि

- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९४९०७४१४१४





१.मेषराशिः - मासपूर्वार्धे कुटुम्बाभिवृद्धिः, आरोग्यं, उत्साहः, सङ्गीतसाहित्याभिलाषः तदा तदा सोदरद्वारा विवादाः, आध्यात्मिकचिन्तनं च भविष्यन्ति। मासोत्तरार्धे वाक्सौमनस्यं, धनलाभः चिन्तितकार्यसिद्धिः विद्यालाभः बन्धुमित्रसमागमः उद्योगपरिवर्तनं भविष्यन्ति। शनिग्रहपूजनं कर्तव्यम्



२.वृषभराशिः - मासपूर्वार्धात् उत्तरार्धे एव शुभफलानि सम्भविष्यन्ति। चिन्तितकार्यजयः, अधिकारजनप्रशंसाः, व्यापारचिन्तनं लाभः सर्वत्रानुकूल्यता, भूविवादाः, संघेकीर्तिः यशःप्राप्तिः, तीर्थयात्राः, दैवदर्शनं, अपरिष्कृतकार्यसिद्धिः सम्भवष्यन्ति। कुजग्रहपूजनं कर्तव्यम्।



३. मिथुनराशिः - मासपूर्वार्धे शुभपरम्पराप्राप्तिः, प्रयाणलाभः, उद्योगपरिवर्तनं, भूलाभः, ज्ञानसाधनेच्छा चिन्तनं, भाग्यलाभः, पितृचिन्ता, दैवदर्शनं आरोग्यं च सम्भविष्यन्ति। उत्तरार्धे क्रोधः, व्ययः, शारिरकमानसिक पीडाः, सम्भवन्त्यपि कार्यजयः देशपर्यटनेच्छा भविष्यन्ति। सूर्यगृहाराधनं कर्तव्यम्।



४.कर्काटकराशि : - देशभ्रमणं, भाग्यलाभः, उद्योगपरिवर्तनं, तद्वारा लाभः कुटुम्बाभिवृद्धिः, मानसोल्लासः, धनलाभः, अपरिष्कृत कार्यसिद्धिः, स्तोत्रपारायणादिषु इच्छा, ज्ञानलाभः शुभकार्येषु निमग्नता, शुभकार्येषु धनव्ययः, व्यापारलाभः भविष्यन्ति। गुरुग्रहराधनं कर्तव्यम्।



५. सिंहराशिः - आध्यात्मिकलाभः, अनारोग्यचिन्तनं, मनोदुःखं, शत्रुनाशः, उद्योगपरिवर्तनं, भाग्यलाभः, अधिकार जनद्वाराप्रशंसाः, स्थानचलनं, अकालभोजनं, ऐश्वर्यं च सम्भविष्यन्ति। शनिग्रहराराधनं कर्तव्यम्।



६. कन्याराशिः - मासपूर्वार्धे कष्टकालः एव। ज्वरपीडा तदा तदा सम्भविष्यति, उत्तरार्धे तावत् भाग्यलाभः अनूह्योद्योगलाभः, बन्धुमित्रद्वारा सुखप्राप्तिः, पितृद्वारालाभः, तीर्थयात्राभिलाषः व्यापारचिन्तनं विद्यालाभश्च भविष्यन्ति। शनिग्रहराधनं करणीयम्।



७. तूलाराशिः - अर्थसिद्धिः, सन्तोषः राज्यलाभः, उन्नतोद्योगप्राप्तिः, भूलाभः,सर्वत्रलाभः, मुख्य बन्धुमित्रसमागमः, सम्भवन्त्यपि तदा तदा धनव्ययः, शरीरशोषणं, वृथापर्यटनं, आध्यात्मिकलाभः, वृथाचिन्तनं, शत्रुद्वारालाभः सम्भविष्यन्ति। शिवाराधनं करणीयम्।



८. वृश्चिकराशिः - कार्यविघ्नाः, धनलाभः, मानहानिः, मतिभ्रंशः, तदा तदा सम्भवन्त्यपि अर्थसिद्धि, भूलाभः, उद्योगलाभः, उत्साहः, सोदरद्वारालाभः, बन्धुमित्रसमागमः, दैवदर्शनं, दूरप्रयाणचिन्तनं सम्भविष्यन्ति। लक्ष्मीपूजनं करणीयम्।



९. धनूराशिः - उत्साहः, धैर्यं, वृथाविवादाः, भाग्यलाभः, यशः, वाहनयोगः, स्त्रीद्वारासौख्यं, आध्यात्मिकचिन्तनं, सन्तानाभिवृद्धिः, व्यापारचिन्तनं, तीर्थयात्राभिलाषः, विद्याव्यासङ्गेषु सामान्य श्रद्धा, इत्येते सम्भविष्यन्ति। लक्ष्मीपूजनं कर्तव्यम्।



१०. मकरराशिः - वाक्पारुष्यं, भ्रातृविषयचिन्ता, वाहनयोगः, शुभकार्याचरणद्वारा धनव्ययः, सन्तोषः, कुटुम्बे स्वल्पविवादाः, उद्योगलाभः सन्तानलाभः आध्यात्मिकचिन्तनं ग्रन्थपठनं अधिकारजनप्रशंसाः सम्भविष्यन्ति। शिवाराधनं करणीयम्।



११. कुम्भराशिः - शरीरस्य अस्वास्थ्यं, वृथाविवादाः, अविवाहितानां विवाहप्राप्तिः, धनधान्यलाभः, सोदरद्वारालाभः, पराक्रमः आलोचनापरम्परायां मतिभ्रंशः, दुस्स्वप्नाः, कार्यजयः विद्याव्यासङ्गेषु भङ्गः सम्भविष्यन्ति। श्रीवेङ्कटेस्वरस्वाम्याराधनं कर्तव्यम्।



१२. मीनराशिः - तदा तदा ज्वरपीडा, निद्राभङ्गः, दुस्स्वप्नाः सम्भविष्यन्त्यपि शान्तस्वभावः दूरप्रयाणानि, अधिकारजन प्रशंसाः, वाहनसौख्यं, विद्यालाभः, वाक्पारुष्यं, आध्यात्मिकज्ञानसाधनेच्छा, व्यापारलाभः तीर्थयात्राभिलाषः सम्भविष्यन्ति। शिवाराधनं कर्तव्यम्।

देवेनोपहतस्य बुद्धिः सर्वा विपर्सस्यति।

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D., P.G.Dip in JMC on behalf of Tirumala Tirupati Devasthanams and Printed and Published at Tirumala Tirupati Devasthanams Press, K.T. Road, Tirupati-517 507. Editor: Dr.V.G. Chokkalingam, M.A., Ph.D. P.G.Dip in JMC.

आन्ध्रप्रदेश् गौरवमुख्यमन्त्री श्रीनाराचन्द्रबाबुनायुडुपौत्रः, आन्ध्रप्रदेश विद्या अपि च ऐ.टि शाखा गौरवशाखामात्यः श्रीनारालोकेश्महाशयस्य तनयः चिरञ्जीवि देवान्स् जन्मदिनं पुरस्कृत्य गौरवमुख्यमन्त्रिणः कुटुम्बसभ्याः 21.03.2026 तिथौ तिरुमलक्षेत्रे श्रीवेङ्कटेशस्वामिदर्शनं प्राप्तवन्तः। नारादेवान्स्जन्मदिनसन्दर्भे तिरुमलक्षेत्रे एकस्य दिनस्य अन्नप्रसादार्थं 44 लक्षरूप्यकव्ययं श्रीनारालोकेश्महाशयः ति.ति.देवस्थानाय बहुमतित्वेन ददौ। ति.ति. देवस्थानपालकमण्डल्यध्यक्षः श्री बि.आर्.नायुडु, ति.ति.देवस्थानकार्यनिर्वहणाधिकारी श्री मुद्दाडरविचन्द्र ऐ.ए.यस्., ति.ति. देवस्थानस्य अनुबन्धकार्यनिर्वहणाधिकारी श्री सि.हेच्.वेङ्कय्यचौदरि ऐ.आर्.यस्.महोदयः गौरवमुख्यमन्त्रिकुटुम्बं आलयमर्यादाभिः सम्मानितवन्तः। श्रीवेङ्कटेशदर्शनानन्तरं मातृश्रीतरिगोण्डवेङ्गमाम्बा-अन्नप्रसाद भवने गौरवमुख्यमन्त्री कुटुम्बसभ्यैः सह स्वयं भक्तेभ्यः अन्नप्रसादान् समर्पयामास। अस्मिन्नेव दिने आ.प्रदेश गौरवमुख्यमन्त्रिणः तिरुमलक्षेत्रे आधुनिकसौकर्यैः निर्मित फुड् एनालसिसूल्याब् प्रारब्धं कृतवन्तः।













SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-04-2026 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.



श्रियासार्धमीशस्सतां रक्षणार्थं स्वयं रत्नशैलेसमाविर्बभूव।
समुत्साहतोयस्समाश्चर्यवीरो भजे सत्यनारायणं तं महान्तम्।।